① पेज = 3

= 24 X 14.3 X 0.1 c.m.

विषय अनुपलब्ध

पुस्तक निवास सहविवल्लभावात्धारत्क पंच

... ...

केचित सर्वो चित्रारवीकाचि देकणावयस्याध्रियं वाध्विति वारणेद्र:

---

② पेज = 1

विषय = पुराण

= 24.5 X 13.5 X 0.1 c.m.

मान्त्रेनहेस्ता वाकार्यम व्यास: जावघनरतौतीर्थ

... ...

गज छायातुला प्रोक्ता पितृभ्योक्षत्य क्षमय उत:

No-36

पुस्तकनिवासससहायिवल्लभा नाम्नाशास्त्रं पंचपठनं परिव
र्जयंति आरोग्यबुद्धिविनियोगमस्तशास्त्ररागाः पंचांतरा
पठनसिद्धिकराभवंति १ गुरुशुश्रूषया विद्या पुष्कलेन ध
नेन वा अथवा विद्यया विद्या चतुर्थी नैव कारणम् २ आल
स्यो मंदबुद्धिश्च सुखी च व्याधिपीडितः निद्रालुः कामुक
श्चैव षडेते शास्त्रवर्जिताः ३ घृतलवणतैलतंदुलत
क्रं धनचिंतया संततं नरपतिविपुलमतेरपि बुद्धिः पुरुष
स्य मंदविभवस्य ४ यस्य नास्ति स्वयं प्रज्ञा शास्त्रं तस्य क
रोति किं लोचनाभ्यां विहीनस्य दर्पणः किं करिष्यति ५
आहारो मैथुनं निद्रा स्वाध्याये च प्रवर्तनं वेलास्वलुक
र्माणि संध्याकाले विवर्जयेत् ६ विद्याभ्यासमनालस्य
पांडित्यं मित्रसंग्रहः अचौरहरणीया सर्वपंचैते निध
नान्यपा ८ विद्या नाम नरस्य रूपमतुलं प्रच्छिन्न

१३ पुंधनं विद्या भोगवती यशः सुखवती विद्या गुरूणां गुरुः विद्याबंधु
जनो विदेशगमने विद्या परं दैवतं विद्या राजसु पूजितो नतु रितहा विद्या
विहीनः पशुः ९ आहारनिद्राभयमैथुनंच सामान्यमेतत्पशुभा
नवानां ज्ञानेनराणामधिको विशेषो ज्ञानेन हीनः पशुभिः समा
नः १० येषां न विद्या न तपो न दानं न चापि शीलं न गुणो न धर्मः ते
मर्त्यलोके भुविभारभूता मनुष्यरूपेण मृगाश्चरंति ११ स्वगृहे
पूज्यते मूर्खः स्वग्रामे पूज्यते प्रभुः स्वदेशे पूज्यते राजा विद्वान्
सर्वत्र पूज्यते १२ गुणदोषानशास्त्रज्ञः कथं विभजते जनः कि
मंधस्याधिकारोस्ति रूपभेदोपलब्धिषु १३ अप्येकाक्षरदा
तारं यो गुरुं नाभिमन्यते श्वानयोनिशतं गत्वा चांडालेष्वनु
जायते १४ रूपयौवनसंपन्नाः विशालकुलसंभवाः विद्याही
नान शोभंते निर्गंधा इव किंशुकाः १५ अनधीत्य[illegible]
स्त्रयोऽन्यच्छास्त्रसमीहते वंतुं सोहेः यदानिगणपतिनिदि

२

यं क्रियते २२ केयूरा न विभूषयंति पुरुषं हारा न चंद्रोज्ज्वला न स्नानं
न विलेपनं न कुसुमं नालंकृता मूर्द्धजाः एका वाणि रलंकरोति पुरुषं
या संस्कृता धार्यते क्षीयंते खिल भूषणानि सततं वाग्भूषणं चाह्नयं २४
पृथ्वीविद्यापद्धतिः ऐश्वर्यस्य विभूषणं सुजनिता शौर्यस्य वाक्संयमो ज्ञा
नस्योपशमः श्रुतस्य विनयो वित्तस्य पात्रे व्ययः अक्रोधस्तपसः क्षमा
प्रभवितुर्धर्मस्य निर्व्याजता सर्वेषामपि सर्वकालस्य मंगं शीलं परं भूष
णं २ जलौहिसंपृक् परमं विभूषणं त्रपांगनायाः कृशता तपस्विनः द्वि
जस्य विद्यैव मुनेरपि क्षमा पराक्रमः शस्त्रबलोपजीविनं २ नागो भा
ति मदेन कं जलरुहैः पूर्णेंदुना शर्वरी शीलेन प्रमदा जवेन तुरगो
नित्योत्सवैर्मंदिरं वाणी व्याकरणेन हंसमिथुनैर्नद्यः सभा पंडितैः स
त्पुत्रेण कुलं नृपेण वसुधा लोकत्रयं धार्मिकैः २ अद्भिः शुध्यंति वस्त्रा
णि मनः सत्येन शुध्यति अहिंसया च भूतात्मा बुद्धि ज्ञानेन शुध्यति
४ जलस्नानं व्रतस्नानं मंत्रस्नानं तथैव च जलस्नानं गृहस्थानां

२

तमस्मिन्जले चिरगतस्य २६ यद्यपि भवति विरूपो वस्त्रालं
कारवेषपरिहीनः सुजनसभां प्रविष्टो राजति विद्याधिकः पु
रुषः २७ अनभ्यासे विषं शास्त्रमजीर्णे भोजनं विषं विषं गो
ष्ठी दरिद्रस्य वृद्धस्य तरुणी विषं २८ वरं पर्वतदुर्गेषु भ्रांतं
वनचरैः सह न मूर्खजनसंसर्गः सुरेंद्रभवनेष्वपि २९ माते
व रक्षति पितेव हितं करोति कांतेव चाभिरमयत्यभिहंति
शोकं विद्या करोति निखिलं खलु बंधुकार्यं सौख्यं च की
र्त्तिमतुलां गुरुतां च लोके ३० सहस्रगुणिता विद्या शतशः
परिकीर्त्तिता अग्रधःसेव जिह्वाग्रे स्थानं निम्नमिवोदकं २१
मदोपशमनं शास्त्रं खलानां कुरुते मदं चक्षुःसंस्कारकं
तेजो उलूकानामिवांधता २२ ज्ञानं मददर्पहरं माद्यति
यस्तेन तस्य को वैद्यः अमृतं यस्य विषायति तस्य चिकित्साक

हरौ प्रमदाजनविश्वासो मृ मुद्राराणि चत्वारि ९ इतिक्रोधप्रकृतिः
नरस्याभरणं रूपं रूपस्याभरणं गुणं गुणस्याभरणं ज्ञानं ज्ञानस्या
भरणं क्षमा १ मूर्खस्य हि बलं मौनं तस्करस्यानृतं बलं दुर्बलस्य ब
लं राजा बालस्य रुदनं बलं २ गर्वं नोद्वहते न निंदति परं नो भाषते
निष्ठुरं श्रुत्वा काव्यमलक्षणं परकृतं संतिष्ठते मूकवत् उक्तं केन
चिदप्रियं च सहते क्रोधं च नालंबते दोषांश्छादयति गुणान्निगदते
चैतत्सतां लक्षणं ३ वारयति वर्त्तमाना परभाग्यगामिनी वस्तुसेवा त
र्मोः चहरति पीतं गंगा या प्रदीपति यौवनः ४ सुजनो न याति वैरं परहि
तनिरतो विनाशकालेपि छेदेपि चंदनतरुः सुरभयति मुखं कुठा
रस्य ५ मार्जिताः सहायानो दर्पणो निर्मलो भवेत् ज्ञानाभ्यासात्तथा
पुंसां बुद्धिर्भवति निर्मला ६ पद्मपत्रे यथा तोयं पत्रे तस्य न लिप्यते
शब्दादिविषयान् भुंजन् तद्वत् ज्ञानी न लिप्यते ७ नरः स्वदेहमाने
च छेदने घर्षणे तथा सुवर्णस्य महादुःखं गुंजया सह तोलने ८ के
तकीकुसुमं भृंगः खंड्यमानोपि सेवते दोषाः किं नाम कुर्वीत
गुणोपहृतचेतसां ९ जलरेखेव नीचानां यत्कृतं तत्र दृश्यते प्र

रसामृते जंभारि एव जानाति रंभा

त्वल्पमपि साधूनां शिलारेखेव तिष्ठति ९ चंदनं शीतलं लोके चंदनाद
पि चंद्रमा चंद्राच्चंदनाभ्यां शीतला साधुसंगतिः ११ संसारकटुवृक्ष
स्य द्वे फले अमृतोपमे सुभाषितरसास्वादः संगतिः सज्जनैः सह १२ ए
कोपि गुणवान्पुत्रः किं निर्गुणशतैरपि एकश्चंद्रस्तमो हंति न च तारा
सहस्रकं १३ विद्वानेव हि जानाति विद्वज्जनपरिश्रमं नहि वंध्या वि
जानाति गुर्वी प्रसववेदनां १४ तुष्यंति भोजने विप्राः मयूरा घनगर्जिते
महांतः परकल्याणे नीचाः परविपत्तिषु १५ पठंति चतुरो वेदान्सर्वशा
स्त्रविचारदाः आत्मज्ञानं न जानाति दर्वी पाकरसं यथा १६ उप
कर्तुं प्रियं वक्तुं कर्तुं स्नेहमकृत्रिमं सज्जनानां स्वभावोयं केनेंदुः शि
शिरीकृतः १७ शैले शैले न माणिक्यं मौक्तिकं न गजे गजे सज्जना नहि
सर्वत्र चंदनं न वने वने १८ पुंसामुन्नतचित्तानां द्वयमेव सुखावहं
सर्वसंगपरित्यक्तिर्वा विभूतिर्वा सविस्तरा १९ वने वने संति वनेचरा
णां निवासयोग्यास्तरवोपि केचित् स कोपि शाखी क्वचिदेव
यस्याश्रयं वांछति वारणेंद्रः २० अर्थिप्रश्नकृतो लोके सुलभोतो

मान्नेन हेम्ना वा कार्यम् व्यासः। आपद्यनग्नौ तीर्थे वा ग्रहणे चंद्रसूर्ययोः आमश्राद्धं द्विजो दद्यात् शूद्रो दद्यात् सदे
व हि नयाहे मादि शानलं तिलिंगपुराणे अग्नेरपत्यं प्रथमं धरित्री गावः सुवर्णं च रसं च धान्यम् श्रेष्ठकमाहु
र्नव नित्त्विमान्ये लोकांश्चिंदत्वान्नहि संशयोत्र न पात्रमिति पात्रमित्र्यक्रमं आले विमुक्ते यदि न स्नायाच्चंद्रसू
र्यग्रहे नरः तस्यनाव दशोचंस्या द्यावदन्यो भवेद्ग्रहः किंच वारेष्वन्येषु यत्पुण्यं ग्रहणे चंद्रसूर्ययोः तदेव कोटिगुणि
तं ग्रहे चूडामणौ स्मृतं तल्लक्षणं चोक्तम् सूर्यग्रहः सूर्यवारे सोमे सोमग्रहो भवेद्यदि चूडामणिरिति ख्यात स्तत्रानं
तफलं स्मृतम् मार्कंडेये चंद्रे वा यदि वा सूर्ये दृश्येत हि महाग्रहः अदृश्यं कथितं पुण्यं तत्रार्के न विशेषतः इति यो
वालिस्मृतौ संक्रांतौ पुण्यकालस्तु षोडशोभयतः कलाः चंद्रसूर्योपरागे तु यावद्दर्शनगोचरः राहुदर्शनसंक्रां
ति विवाहात्यय वृद्धिषु स्नानदानादिकं कार्यं निशि काम्यव्रतेषु चेति अत्रानेकवाक्येषु उपरागस्य दर्शनशब्दप्र
योगात् चाक्षुषज्ञानविषयत्वमुक्तम् यावद्दर्शनगोचर इति यावदिति पदेन संक्रांतिवत् पूर्वापरकाला
न्वित पुण्यत्वं किंतु ग्रासावच्छिन्नस्येति दे[illegible] दस्य निरूपपदस्य चाक्षुषज्ञाने प्रवृत्तेस्तद्विषययोग्य
वस्तुपरं गोचरपदम् अतो मेघादि[illegible] दर्शनगोचरत्वाभावान्न स्नानादिकार्यम् नन्वेवं दर्शना
नंतरं मेघच्छन्नेनधिकारश्चेत् [illegible] इति स्नानानंतरमेवाधिकार इत्यवश्यं कार्य वाच्यम् न
हि स्नानकालेऽपरक्तदर्शनं [illegible] स्नानस्थाने [illegible] तत्तदनंतरमदर्शने विमुक्तिपर्यंतमाधिको
रानुवृत्तिरवश्यं वाच्या [illegible] नयोग्यताया [illegible] पत्तिनेदा ज्ञायते तेन चाक्षुषज्ञानगोचरस्यैवोप
रागस्य स्नानादिनिमित्तत्वं [illegible] त्रावगन्तव्यम् अत एव दिवा तत्र चंद्रग्रहणे नैशं सूर्यग्रह
णं च स्नानादिनिमित्तं नास्ति [illegible] दारात्रौ दिवा चंद्रग्रहस्तथा न तत्र स्नानं कुर्वीत दद्याद्दानं च न

त्ति तत्सर्वं ग्रहणे देयमात्मनः श्रेय इति तत्र ब्राह्मणपरीक्षापि नापेक्ष्यते तथाहि श्रोत्रियो श्रोत्रियो वापि पात्रं वापा
त्रमेव च विप्रवित्तोपि वा विप्रो ग्रहणे दानमर्हति व्यासोपि सर्वं गंगासमं तोयं सर्वे व्याससमा द्विजाः सर्वं भूमिसमं दानं
ग्रहणे दानमर्हति श्राद्धं चावश्यं कार्यम् तथा च सर्वस्वेनापि कर्त्तव्यं श्राद्धं वै राहुदर्शने अकुर्वाणस्तु तत्र श्राद्धं पंके गौ
रिव सीदति विष्णुश्च राहुदर्शनसंक्रांतौ श्राद्धमाचंद्रतारकं गुणवत्सर्वकामीयं पितॄणामुपतिष्ठते व्यासश्च रागः राहुग्र
स्ते रवौ चंद्रे यस्तु श्राद्धं प्रकल्पयेत् तेनेयं सकला पृथ्वी दत्ता विप्रलदक्षिणा अत्राशौचवतापि दानश्राद्धादिष्वधि
कारी यदुक्तं सूतके मृतके चैव न दोषो राहुदर्शने तावदेव भवेच्छुद्धिर्यावन्मुक्तिर्न दृश्यते स्नात्वा कर्म परित्या
गो राहोरन्यत्र सूतके तत्कालमुपरागे तु शुद्धिः स्यादशुचेरपि स्नात्वा संध्यावंदनादि इति अंगिराश्च सर्ववर्णाश्च मृ
तके सूतके राहुदर्शने स्नात्वा श्राद्धं प्रकुर्वीरन् दाने शाठ्यविवर्जितमिति ग्रहणे सति ग्रहणनिमित्ताशौचं सर्वेषां
स्नाना शुद्धिकर्माधिकारः वृद्धपुराणे आशौचे जायते नॄणां ग्रहणे चंद्रसूर्ययोः स्नात्वा स्यादधिकारी सदा नादौ क
ल्पयेतेन रः ग्रहणकालस्य सर्वस्यापि पुण्यत्वेपि स्पर्शकालः स्नानादौ श्रेष्ठः मध्यकालो मध्यमः व्यासः त्रिदशाः स्प
र्शसमये तिष्ठंति पितरस्तथा मध्यामध्यकालेन मोक्षकालेन राक्षसाः ब्रह्मवैवर्तेपि स्नानं स्यादुपरागादौ मध्ये
होमः सुरार्चनम् तथा ग्रस्यमाने भवेत्स्नानं ग्रस्ते होमो विधीयते मुच्यमाने च वै श्राद्धं मुक्ते स्नानं विधीयते पद्मपु
राणे उपमर्हेल दत्तं ग्रहणे चंद्रसूर्ययोः पुण्यं कोटिगुणं मध्ये मुक्तिकाले त्वनंतकमिति एवं मोक्षकालस्य
यदा मुख्यत्वमुक्तं तन्मुख्यमस्नानादौ वनहेतादौ तत्कर्म अतो ग्रासकाले स्नानादि मध्ये होमसुरार्चने मुच्यमाने श्रा
द्धदानमिति क्रमो व्याख्यानसारेण प्रतीयते सर्वकालो वा व्यासांतरे श्राद्धाद्युक्तः अतो मोक्षकाले श्राद्धं पूर्वमुक्तं
लिंगपुराणे व्यतीपातसहस्राणां ग्रहणे चंद्रसूर्ययोः ग्रहणे गजच्छायापातसामप्राप्तापि तत्फलोदत्तमक्षयम् अतः श्राद्धमा